# VYAS PANCHANG

ज्योतिष-पंचांग-पूजा पाठ एवं ज्योतिष परामर्श

बालागाम,ता.केशोद,जिला.जूनागढ़,गुजरात,भारत(इन्डिया) पिन:362220

www.vyaspanchang.com, help@vyaspanchang.com, MO.NO.94087 28736 (11 AM TO 06 PM)

# ऋणहर्तागणेशस्तोत्रम्

संस्कृत

VYAS PANCHANG



Scanned by CamScanner

# ऋणहर्तागणेशस्तोत्रम्

कैलासपर्वते रम्ये शम्भुं चन्द्रार्धशेखरम्।
षडाम्नायसमायुक्तं पप्रच्छ नगकन्यका॥

रमणीय कैलासपर्वतपर छः आम्नायोंसे युक्त चन्द्रार्धशेखर भगवान् शिव बैठे थे, उस समय गिरिराजनन्दिनी पार्वतीजीने उनसे पूछा—

*पार्वत्युवाच*

**देवेश परमेशान सर्वशास्त्रार्थपारग।**
**उपायमृणनाशस्य कृपया वद साम्प्रतम्॥**

**पार्वतीजी बोलीं**—सम्पूर्ण शास्त्रोंके अर्थज्ञानमें पारंगत हे देवेश्वर! हे परमेश्वर! अब कृपापूर्वक मुझे ऋणनाशका उपाय बताइये।

*शिव उवाच*

**सम्यक् पृष्टं त्वया भद्रे लोकानां हितकाम्यया।**
**तत्सर्वं सम्प्रवक्ष्यामि सावधानावधारय॥**

**शिवजीने कहा**—हे कल्याणि! तुमने लोकहितकी कामनासे यह बहुत उत्तम बात पूछी है; मैं इस विषयमें सब कुछ बताऊँगा; तुम सावधान होकर सुनो—

विनियोग

**ॐ अस्य श्रीऋणहरणकर्तृगणपतिस्तोत्रमन्त्रस्य सदाशिव ऋषिः, अनुष्टुप् छन्दः, श्रीऋणहरणकर्तृगणपतिर्देवता, ग्लौं बीजम्, गः शक्तिः, गों कीलकम्, मम सकलर्णनाशने जपे विनियोगः।**

ऋष्यादिन्यास

**ॐ सदाशिवर्षये नमः शिरसि। अनुष्टुप्छन्दसे नमः मुखे। श्रीऋणहर्तृगणेशदेवतायै नमः हृदि। ग्लौं बीजाय नमः गुह्ये (मूलाधारे)। गः शक्तये नमः पादयोः। गों कीलकाय नमः सर्वाङ्गे।**

करन्यास

**'ॐ गणेश' अङ्गुष्ठाभ्यां नमः। 'ऋणं छिन्धि' तर्जनीभ्यां नमः। 'वरेण्यम्' मध्यमाभ्यां नमः। 'हुम्' अनामिकाभ्यां नमः। 'नमः' कनिष्ठिकाभ्यां नमः। 'फट्' करतलकरपृष्ठाभ्यां नमः।'**

Scanned by CamScanner

हृदयादिन्यास

'ॐ गणेश' हृदयाय नमः। 'ऋणं छिन्धि' शिरसे स्वाहा। 'वरेण्यम्' शिखायै वषट्। 'हुम्' कवचाय हुम्। 'नमः' नेत्रत्रयाय वौषट्। 'फट्' अस्त्राय फट्।

*ध्यान*

**सिन्दूरवर्णं द्विभुजं गणेशं लम्बोदरं पद्मदले निविष्टम्।**
**ब्रह्मादिदेवैः परिसेव्यमानं सिद्धैर्युतं तं प्रणमामि देवम्॥**

सच्चिदानन्दमय भगवान् गणेशकी अंगकान्ति सिन्दूरके समान है। उनके दो भुजाएँ हैं, वे लम्बोदर हैं और कमलदलपर विराजमान हैं, ब्रह्मा आदि देवता उनकी सेवामें लगे हैं तथा वे सिद्धसमुदायसे युक्त हैं—ऐसे श्रीगणपतिदेवको मैं प्रणाम करता हूँ।

इस प्रकार ध्यान करनेके पश्चात् निम्नांकित स्तोत्रका पाठ करे—

**सृष्ट्यादौ ब्रह्मणा सम्यक् पूजितः फलसिद्धये।**
**सदैव पार्वतीपुत्र ऋणनाशं करोतु मे॥ १॥**
**त्रिपुरस्य वधात् पूर्वं शम्भुना सम्यगर्चितः।**
**सदैव पार्वतीपुत्र ऋणनाशं करोतु मे॥ २॥**
**हिरण्यकश्यपादीनां वधार्थे विष्णुनार्चितः।**
**सदैव पार्वतीपुत्र ऋणनाशं करोतु मे॥ ३॥**
**महिषस्य वधे देव्या गणनाथः प्रपूजितः।**
**सदैव पार्वतीपुत्र ऋणनाशं करोतु मे॥ ४॥**

Scanned by CamScanner

तारकस्य वधात् पूर्वं कुमारेण प्रपूजितः।
सदैव पार्वतीपुत्र ऋणनाशं करोतु मे॥ ५॥
भास्करेण गणेशस्तु पूजितश्छविसिद्धये।
सदैव पार्वतीपुत्र ऋणनाशं करोतु मे॥ ६॥
शशिना कान्तिसिद्ध्यर्थं पूजितो गणनायकः।
सदैव पार्वतीपुत्र ऋणनाशं करोतु मे॥ ७॥
पालनाय च तपसा विश्वामित्रेण पूजितः।
सदैव पार्वतीपुत्र ऋणनाशं करोतु मे॥ ८॥
इदं त्वृणहरं स्तोत्रं तीव्रदारिद्र्यनाशनम्।
एकवारं पठेन्नित्यं वर्षमेकं समाहितः॥ ९॥
दारिद्र्यं दारुणं त्यक्त्वा कुबेरसमतां व्रजेत्॥ १०॥

॥ इति श्रीकृष्णयामलतन्त्रे उमामहेश्वरसंवादे ऋणहर्तागणेशस्तोत्रं सम्पूर्णम्॥

Scanned by CamScanner